५००८

नं. ५००८

हरितालिका व्रत कथा.

× × ×

पत्र. ३ ———— सं. ×

पुराण माहात्म्यं

✓

हरितालिकाव्रतकथा भविष्योत्तरे



५००७

5007

F. = 3

ॐ श्रीगणेशाय नमः ॐ नमः शिवाय मंदारमालाकलितालकायै कपालमालांकि
तशेखराय दिगम्बरायै च दिगंबराय नमः शिवायै च नमः शिवाय १ कैलाशशिखरे र
म्ये गौरी पृच्छति शंकरं गुह्याद्गुह्यतरं गुह्यं कथयस्व महेश्वर २ सर्वेषां चैव धर्माणां म
त्वायाः सुमहत्फलं प्रसन्नोसि यदा नाथ तत्सर्वं ब्रूहि मम अग्रतः ३ केन दत्तं पुरा प्राप्तं
केन दानव्रतेन च अनादिमध्यनिधनं भर्तारं च जगत्प्रभो ४ ईश्वरोवाच शृणु देवि प्रवक्ष्या
मि तवाग्रे व्रतमुत्तमं गुह्यं तु मम सर्वं तु कथयामि तवाग्रतः ५ यथाहं चोडुगणे चंद्रो ग्र
हाणां भानुरेव च वर्णानां च यथा विप्रो देवानां विष्णुरुत्तमः ६ नदीनां च यथा गंगा पु
राणानां तु भारतः वेदानां च यथा साम इन्द्रियाणां च मनो यथा ७ पुराणानां वेदसर्वस्वमाग
मेत यथोदित एकाग्रेण शृणु त्वं यथा दृष्टं पुरा व्रतं ८ भाद्रमासि सिते पक्षे तृतीया हस्त
संयुता तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ९ शृणु देवि तृतीयायां पूर्वं व्रतं चरितमुत्तमं
तत्सर्वं कथयिष्यामि यथा दृष्टं हिमाचले १० पार्वत्युवाच कथं एवं मया देव चरितं व्रत
मुत्तमं तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर ११ ईश्वरोवाच अस्ति देवी महादिव्यो हि
पर्वते हेमश्रृंगे मवान्नगेश्वरः नानापक्षिसमायुक्तो नाना नागैर्विचित्रितः १२ यत्र देवाः सगंधर्वाः सिद्ध नानासिद्धसमाकीर्णो नानाद्रुमसमाकुलः
चारणगुह्यकाः विचरंति यथा हृष्टा गंधर्वा गीततत्पराः १३ स्फटिकैः कांचनैः शृंगैर्मणिवैदू
र्यमंडितैः लिखंतमिव चाकाशे गंगापानविचित्रितैः १४ अप्सरोनृत्यसंघातैः से

श्रीव्रतप्रभावेण ज्ञानमर्धासनं मम तत्सर्वं कथयिष्यामि यथा दृष्टं व्रतं पुरा

लतावृंदपत्राणि पर्णशीत्यक्तपर्णा ततः परं

अब्दानां तु सहस्रं वै

श्री॰ ह॰ ता॰ पु॰ क॰ ॰१

मार्नेनगेश्वरः तत्र त्वं पार्वती बाले तपंती सुमहातपः १५ अथ दृष्ट्वा ह्यदर्कं देवीं असपानमधोमुखीं
संवत्सरचतुः षष्टिपञ्चपर्णाशानं तथा १६ दृष्ट्वा तां तेमुनिः कश्चिंतिनयादुःखितोभवत् कस्मै
देयामयाकन्या इत्येवं चिंतितोभवत् १७ तस्यैव चिंतयाविष्टस्य ययौ नारदो मुनिः अर्घ्या
दिभिः समाभ्यर्च्य हिमवान् अभिभाषत। १८ हिमवानुवाच किमर्थमागतो देव कथ्यतां मु
निसत्तमः तथ्यं ब्रूहि ममाग्रे तु द्विजराज नमोस्तु ते १९ नारद उवाच शृणु देव यथा तथ्यं वि
स्मृता पुत्रिका तेऽद्य योग्यायोग्ये प्रदातव्या कुमारी रत्नमिदं त्वया २० वासुदेवसमो नास्ति ब्रह्मश
ऋषिवादिषु तस्मात्त्वया प्रदातव्या कन्यका मम संमतिः २१ हिमवानुवाच वासुदेवस ईश्वरउवाच २४
मो देवः कन्या प्रार्थयते यदि तदा मया प्रदातव्या त्वया गमविशेषतः २२ तच्छ्रुत्वा प्रययौ तस्य।
नारदो केशवं प्रति उपगम्य मुनिर्देवं शार्ङ्गचक्रगदाधरं २३ कृतांजलिपुटो भूत्वा मुनिर्द्र
प्रत्यभाषतः नारद उवाच देवदेव प्रभुः कार्यं विवाहं चिंतितं तव। २४ हिमवान् स्वतनयां सार्द्धं
मुक्तसत्यमुदीर्यते इत्येवं चामया दत्ता देवदेवाय विष्णवे २५ अथ श्रुत्वा मुनेर्वाक्यं पार्वती
दुःखिताभवत् दुःखभारातिसंतप्ता सखी पप्रच्छ तां निशि २६ सख्युवाच किमर्थं दुःखिता
त्वं च सत्यं मां ब्रूहि पार्वति येनेदं तु त्वया भद्रे करिष्येहं तव प्रिये २७ पार्वत्युवाच पार्वती वच
नं श्रुत्वा सखी वचनमब्रवीत् न जानाति पिता यत्र वृत्तं तद्दुःखं महत् २८ इत्येवं सा मतिं कृ ति=
त्वा निष्क्रामसमहद्वनं पिता वलोकयामास हिमवान् सापि न गृहे २९ केन नीता च मे पुत्री देव
दानवकिन्नरैः सत्यं कृतं मया सर्वं किं दास्ये गरुडध्वज ३० इत्येवं चिंतयाविष्टो मर्छितं पति

मयाय च्चिंतितं कार्यं तातेन कृतमन्यथा तस्माद्देहं परित्यागं करिष्येहं न संशयः २८

राम॰ ॰१

नोभुवि। हाहाकृतं ततो लोकैः प्रधावति मुनिश्चितं ३१ कस्मात्वं महर्षीणां तां श्रान्तः कथ
यत्वविशेषतः नगेश्वरोवाच दुःखेन महताप्राप्तं कन्यारत्नमिदं तदा ३२ केनेदं दुष्ट 'य =
वा चित्तेन कन्यारत्नं हृतं मम दृष्टा कालसर्पेण सिंहव्याघ्रेण वाहना ३३ नजाने क गता
पुत्री केन दुष्टेन वाहता कंपते शोकसंतप्तो वातेनेव यथा तरुः ३४ तं गतासि वनं घोरं नि
र्जनं जलवर्जितं सिंहव्याघ्रगजव्येड मृगपक्षिसमाकुलं ३५ तस्मिन् वने महाघोरे स
खिभिस्सह संस्थिता वालुकास्थापितं पिंडं पार्वत्यासहितं मम भाद्रमासि तृतीयायां हस्त
नक्षत्रसंयुतं नागीते नवाद्येन रात्रौ जागरणं कृतं ३६ तेन व्रतप्रभावेन आसनं चालितं
भवा संप्राप्तो देवितत्रैव यत्र त्वं सखिभिस्सह। ३७ प्रसन्नोस्मि मया प्रोक्तं वरं ब्रूहि वरानने
श्रीपार्वत्युवाच। यदि च त्वं प्रसन्नोसि भर्ता भव महेश्वर। तथेत्युक्त्वा मया देवी कैलाशं
पुनरागतः ३८ ततः प्रभाते विमले कृत्वा चैव विसर्जनं पारणं तु कृतं तत्र यदुक्तं वनगो।
चरैः ४० तत्रैव त्वं प्रसन्नासि सखीसार्द्धं वरानने हिमवानपि तं देशमाजगाम वनेवने ४१
अन्वेषयंश्च चतुर्दिक्षु पानसंभोजनवर्जितं दृष्ट्वा तत्र नदीतीरे प्रसुप्तं कन्यकाद्वयं ४२ हिमवा उत्थाप्योत्संग मानीय पार्वतीं च वचो ब्रुवीत् ४४
नुवसंतप्तो रोदनं च चकार सः सिंहव्याघ्रादिभिर्दुष्टैः किमर्थं वनगोचरे ४३ पार्वत्युवाच मम
भर्ता महादेवं शंकरं परमेश्वरं कृत्वादास्य हिमांनानां देहं त्यागं स्मि निश्चितं ४४ शीतलं सं
तर्पनीयं करिष्यामि शिवार्थिना श्रुणु चैतद्वचनं हिमवानुक्तं तथेतिच ४५ हिमवा
श्रुत्वा चैतद्वचो पुत्र्याः

श्री:
ह० ता०
व्र० कौ०
०२

शेवाच एवमुक्ता हिमवता मानीय गृहं प्रति श्रुत्वेवं वचनं तस्य प्रहर्षोत्फुल्लवक्त्रका ४६ अद्य मे
सफलं जन्म अद्य मे सफलं तपः ततः प्रभृति तीर्थस्मात् कुण्डं वाहिकी लयं ४७ तेन व्रतप्रभावेन सौ
भाग्यं प्राप्तवाम्यहं नदा देव व्रतराजस्य कस्याग्रे न निवेदितं ४८ व्रतराजस्य नामेदं शृणु देविय
या भवेत् आलिभिर्हरिता यस्मात्तस्मात् सा हरितालिका ४९ श्रीपार्वत्युवाचः नामेदं कथितं
देव विचित्रमिदमेव च किं पुण्यं किं विधिश्चास्य केन वा क्रियते जने ५० श्रीईश्वरोवाच शृणु दे
वि विधानं वस्ये नारीणां व्रतमुत्तमं कर्तव्यं तु प्रयत्नेन यदि सौभाग्यमिच्छति ५१ तोरणादिप्रकर्तव्यं
कदलीस्तंभमण्डितं चंदनादिसुगंधैश्च लेपयेद्गृहमंडितं ५२ शंखभेरीमृदंगैश्च वाद्ययेद्ध[illegible]
भिर्ततैः नानामंगलमाचारकर्तव्यं मम सद्मनि ५३ स्थापनं तत्र कर्तव्यं पार्वत्या सहितं मम
पूजयेद्विविधैः पुष्पैः रात्रिजागरणं कृतं ५४ नालिकेरैः खर्जूरैः जंभीरैः फलैश्च विविधैस्तथा अ
र्बुदैः शोड्य वैस्सरैः नैवेद्यैर्विविधैस्तथा ५५ पक्वान्नैर्विविधैः कृत्वा वृक्षोद्यानमनोहरैः पु
ष्पजातीननेकानि दत्त्वा[illegible] क्रमुकैः ५६ धूपदीपादिभिश्चैव मंत्रेणानेन पूजयेत् ॐ
शिवायै शिवरूपायै मंगलायै महेश्वरी ५७ शिवे सर्वप्रदे देवि शिवरूपे नमोस्तु ते ५७ संसारभी
रुर्वस्येहं त्राहि मां हि हवाहिनि मया ह्येतेन कामेन पूजितासि महेश्वरि ५८ राज्यं देहि च सौभा
ग्यं प्रसन्ना भव पार्वति पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदस्व मे ५९ मंत्रेणानेन मे देवि सं
पूजिता त्वं मया सह ।। कथां श्रुत्वा विधानेन दद्याद्दानानि पार्वति ६० ब्राह्मणाय प्रदातव्यं वस्त्रं
गुहराधकं कथायाश्चैव कर्तव्यं नेन दंपत्या सहितेन तत ६१ संतर्पयेत्तु ततः कुर्याद्धूपादिभिस्तथा

कल्पंतु

श्री
ह॰ ता॰
व्र॰ क॰
॰३

येकुर्वंति महादेवि व्रतराजं विधानतः ६२ सौभाग्यं राज्यमायुष्यं यशः कीर्तिमवाप्नुयात् ।
अंते शिवपुरं यांति पुनरावर्त्तिदुर्लभं ६३ तृतीयायां तु या नारी आहारं कुरुते यदि सप्त
जन्म भवेद्वंध्या वैधव्यं च पुनः पुनः ६४ दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी पतती
नरके घोरे उपोष्यं न करोति या ६५ कांचनं रौप्यपात्रं वा वेणुमृण्मयभाजनं ततः श्रो
निपात्राणि फलानि विविधानि च ६६ दद्यात् पुनः स्त्रीलोकेभ्योदनं दद्यादनंतरं स्त्रीजा
न्मा मुच्यते सा वै दिव्यपुण्यमवाप्नुयात् ६७ एतद्व्रतप्रभावेन सौभाग्यं स्थिरमाप्नुयात् ।
सप्तजन्मकृतं पापं मुच्यते नात्र संशयः ६८ अश्वमेधसहस्राणि वाजिमेधशतानि च
कथाश्रवणमात्रेण तत्फलं लभते नरः ६९ एतत्ते कथितं देवि तव वाक्ये च वरानने स ग्र
त्समर्थविधिवत्क्षे अन्नामेन यथोदितं ७० गोभूहिरण्यदानानि वस्त्रदानं पुरःसरं य
थायोग्यं च कर्त्तव्यं सर्वपापैः प्रमुच्यते ७१ इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे
हरतालिकाव्रतकथा समाप्ता ॥ शुभम् संवत् ७९ भाद्रपदवदि दशम्यां बुधवासरे ।
लिखितं गिरिगुणानुत नारायणप्रसादः शुभम् श्रेयम् कल्याण शिवमस्तु ॥

राम॰
॰३

3